## संप्रदानसंज्ञाविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

सूत्रार्थः

उदाहरणम्

सूत्रे यं स ग्रहणं करिमर्थमिति शङ्का

तद्वारणम्

सूत्रे उपसर्गद्वयं किमर्थमिति विवेचनम्

संप्रदानभेदाः

सम्प्रदानसंज्ञा अन्वर्थसंज्ञेति मतनिरूपणम्

रजकाय वस्त्रं ददाति इति न प्रयोगः

रजकस्य वस्त्रं ददातीति प्रयोगः

क्रियाग्रहणं कर्तव्यमिति वार्तिकविचारः

अत्र वार्तिककारमतम्

भाष्यमतनिरूपणम्

**सप्रदानविषये मतभेदनिरूपणम्**

**कर्मणा यमभिप्रैति स संप्रदानम्**[1]इति सूत्रेण संप्रदानसंज्ञा विहिता।कर्मणा इति तृतीयान्तम्। कर्मणा इति करणे तृतीया। अभिप्रैतीति तिङन्तं पदम्।सः इति प्रथमान्तम्। सम्प्रदानमित्यपि प्रथमान्तम्। सूत्रे ऽस्मिन् कारके इत्यधिक्रियते। अधिकारो नाम **स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति (प्रयोजनाभावेपि) स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वम्।**तथा च दानस्य कर्मणा करणभूतेन यमभिप्रैति स सम्प्रदानसंज्ञं स्यादिति सूत्रार्थः फलति। दानक्रिया कर्मणा कर्ता यम् अभिप्रैति = इच्छति = सम्बध्नाति = ईप्सति वा तत्कराकं सम्प्रदानं स्यादिति निगूढार्थः।सूत्रे यमभिप्रैती त्युक्त्या यमिति निर्दिष्टस्य शेषित्वं=उद्देश्यत्वं, कर्मणेति निर्दिष्टस्य शेषत्वं=अप्रधानत्वरूपं, च प्रतीयते। यथा- **स्वरितञितः कर्त्रभिप्राये क्रियाफले**[2] इति सूत्रे कर्त्रभिप्राये क्रियाफले इत्युक्त्या कर्तुः शेषित्वं क्रियाफलस्य शेषत्वं च प्रतीयते। प्रकृते यस्य शेषित्वं तस्यैव सम्प्रदानत्वमिति

---

[1] .1-4-32(अष्टाध्यायी)

[2].1-3-72(अष्टाध्यायी)

कृत्वा **अजां ग्रामं नयती** त्यत्र अजायाः ग्रामं प्रति अशेषत्वात् तन्निरूपितशेषित्वस्य ग्रामे अभावान्न तस्य तत्संज्ञा। अजां ग्रामं नयती त्यत्र ग्रामः अजासम्बद्धो भवत्विति नेतुः नेच्छा, किं तु अजा ग्रामसम्बद्धा भवत्विति। यदा तु ग्रामः अजासंयुक्तो भवत्विति उद्देशेन अजानयनं स्यात्, तदा ग्रामस्य सम्पदानत्वमिष्टमेव- अजां ग्रामाय नयतीति। अजापुरूषसम्बन्धेनाधिकसस्यसम्पत्या विलक्षणशोभाजननाय ग्राममजासंयुक्तं जनः करोति।स्पष्टं चेदं सर्वं भूषणसारादिषु[3]। हरिदीक्षतस्तु **अजां ग्रामं नयती** त्यत्र परत्वाकर्मत्वेन सम्प्रदानत्वं बाध्यते। अन्यथा अजाग्रामसम्बद्धा भवत्वित्यभिप्रायेण अजानयने तस्याः सम्प्रदानत्वापत्तिरित्यभिप्रैति। अमुमेवाभिप्रायं मनसि निधाय **कर्मसंज्ञया बाधान्न दोष इति[4] तत्वम्** इति प्रौढमनोरमाव्याख्याने प्रोक्तम्।

विप्राय गां ददाति इत्युदाहरणम्। राजा विप्राय गां ददातीति वाक्यार्थः।स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वानुकूलरूपेच्छा क्रिया अत्र वर्तते। तस्याः क्रियायाः फलाश्रयत्वेन कर्म गौः। अभिसम्बन्धक्रियायां प्रति कर्मणः करणत्वम्। तथा च दानक्रियाकर्मणा गवा कर्ता यं विप्रमिच्छति तस्य विप्रस्य सम्प्रदानसंज्ञा सिध्यति। तेन **चतुर्थी सम्प्रदाने**[5]इति सूत्रेण चतुर्थीविभक्तिः। विप्राय गां ददाती त्यत्र एकस्मिन् काले गवादेः कर्मत्वं करणत्वं कथमिति नाशङ्कनीयम्। कुत इति चेत् क्रियाभेदस्य सत्वात्। दानक्रियायां गौः कर्म, अभिप्रयणक्रियायां करणम्। दीयमानया हि गवा राजा विप्रमभिप्रैति।

**अत्र संशयः**

अध्याहारेणापि सर्वनमद्वयार्थस्य लाभात् सूत्रे "**यं ,सः**" इत्यनयोर्ग्रहणं किमर्थमिति।

**समाधानम्**

अभिप्रयतः कर्तुः संप्रदानसंज्ञावारणार्थं तद्ग्रहणम्। तथाहि- अभिप्रैतीति कर्तृतिङश्रुत्या"**यः सः**"इत्येव लभ्यते। तथा च तदर्थसंबन्धेनैव निराकाङ्क्षतया यं सः इत्याध्याहारो नोपपद्यते। तथा च कर्मणा यो अभिप्रैति स संप्रदानमिति सूत्रार्थलाभात् कर्तुरेव संप्रदानत्वं स्यात्। ततश्च उपाध्यायाय शिष्येण गौर्दीयते इत्यर्थे शिष्याय उपाध्यायस्य गौर्दीयते इति प्रयोगापत्तिः। अतः सूत्रे "**यं ,स**" ग्रहणम्। तेन अभिप्रयतः संप्रदानत्वं निवार्यते।

**पुनः संशयः**

सूत्रे उपसर्गद्वयग्रहणं किमर्थमिति , तदभावेपि कर्मणा यमेति = गच्छति प्राप्नोति संबध्नातीत्यर्थो लभ्यते, अभिप्रैतीत्युक्तेपि पूर्वोक्तार्थ एव खलु इति।

---

[3].वैयाकरणभूषणसारः-सुबर्थनिर्णयः, पृ-375,380,381,

[4].प्रैढमनोरमा, कारकप्रकरणम्, पृ-905

[5].2-3-13(अष्टाध्यायी)

**समाधिः**

संनिहितसंप्रदानस्थले दानस्य तत्काले विप्रसंतोषरूपदृष्टफलवत्वात् तत्रैव संप्रदानत्वं स्यात्, असंनिहित संप्रदानस्थले विप्राय गां ददातीति न स्यात्। अतः सूत्रे यम्, अभि इति उपसर्गद्वयग्रहणम्। अभिराभिमुख्ये वर्तते, प्रशब्दः आदिकर्मणि। तथा च कर्मणा करणभूतेन कर्ता क्रियारम्भे यमुद्दिशति स संप्रदानमिति सूत्रार्थो लभ्यते। स च उद्देशः संनिहितासंनिहिते च सर्वत्रास्तीति विप्राय गां ददाति, अदात, दास्यतीति प्रयोगाः सिध्यन्ती ति सर्वं सुस्थम्।

**संप्रदानभेदाः**

**अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।**

**प्रेरणानुमतिभ्यां लभते संप्रदानताम्** ।।इति।

कर्तुः त्यागस्य निमित्तं कर्मणा ईप्सितं च यद्वस्तु अनिराकरणात् प्रेरणयानुमत्या च कारकं सत् तद्विशेषं संप्रदानत्वं लभते इति कारिकाशयः। इदं सम्पदानं अनिराकर्तृ, प्रेरयितृ, अनुमन्तृ इति त्रिधा वर्तते।

1.अनिराकर्तृ-------- देवता------सूर्याय अर्घ्यं ददाति । नात्र सूर्यः प्रार्थयते, नानुमन्यते, नापि निराकरोति।

2.प्रेरयितृ----------- याचकः----विप्राय गां ददातीति। विप्रेण मह्यं गां देहीति पूर्वं प्रवर्तितो राजा तस्मै गां ददाति। अत्र पूर्वव्यापारप्रेरकत्वं विप्रे।

3.अनुमन्तृ---------उपाध्यायाय गां ददाति। उपाध्यायो न प्रेरयति, न निराकरोति, अपि तु एवमस्त्विति अनुमन्यते।

**अत्र काशिकाकारमतम्**

**लघ्वर्थं संज्ञाकरणम, संज्ञा नाम यतो न लघीयः** महत्याः एतस्याः सम्प्रदानसंज्ञायाः प्रयोजनम् अन्वर्थत्वाय। तथाच सम्यक् प्रदीयते अस्मै तत्सम्प्रदानमिति। दानक्रिया कर्मणा कर्ता यमभिप्रैति तत् कारकं सम्प्रदानमिति अर्थः। दानञ्च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनम्। अत एव **रजकाय वस्त्रं ददाति** त्यत्र न सम्प्रदानसंज्ञा, किन्तु रजकस्य वस्त्रं ददाती त्येव इति।

वस्तुतस्तु सूक्ष्मदृष्ट्या परिशील्यमाने तत्र स्वत्ववृत्तेरभावेपि **न शूद्राय मतिं दद्यात्, खण्डिकोपाध्यायः शिष्याय चपेटां ददाती**ति भाष्यकारीयप्रयोगदर्शनेन तस्याः अन्वर्थत्वाश्रयणमयुक्तम्। **रजकस्य वस्त्रं ददातीति** तु शेषत्वविवक्षयापि सिध्यति। अत एव पत्ये शेते, ग्रामाय गच्छतीति प्रयोगाणां सम्प्रदानचतुर्थ्या निर्वाहं प्रदर्श्य क्रियाग्रहणं कर्तव्यम् इति वार्तिकस्य, गत्यर्थकर्मणी त्यादि सूत्रस्य च प्रत्याख्यानं भगवतः सङ्गच्छते।

**क्रियाग्रहणं कर्तव्यमिति वार्तिकविचारः**

**पत्ये शेते, श्राद्धाय निगर्हते, युद्धाय सन्नह्यते इत्यादौ** शीङादिधातूनामकर्मकत्वेन कर्मणः अभावात् प्रकृतसूत्रेण संप्रदानत्वं न सिध्यति, तथा चैते प्रयोगाः कथं सिध्येयुरिति शङ्कां मनसि निधाय, पूर्वोक्तस्थलेषु सम्पदानत्वासम्पादनार्थं **क्रिया** ग्रहणं कर्तव्यमिति वार्तिकमारब्धं श्रीमता कात्ययनमहर्षिणा। तथा च शयनादिक्रियाभिः पत्यादीनामभिप्रेयमाणत्वात् तेषां सम्प्रदानत्वं सिध्यतीति वार्तिकस्याशयः।

**महाभाष्यकाराणामाशयः**

वस्तुतस्तु सम्प्रदानसंज्ञाविधायकसूत्रस्थ क्रियाग्रहणं कर्तव्यमिति वार्तिकं भगवता भाष्यकारेण प्रत्याख्यतम्। तथा हि- [6]क्रियाग्रहणमपि कर्तव्यम्। इहापि यथा स्यात् = श्राद्धाय निगर्हते, युद्धाय सन्नह्यते, पत्ये शेते इति तर्त्तर्हि वक्तव्यम्? न वक्तव्यम्? कथम्? क्रियां हि लोके कर्मेत्युपचरन्ति- कां क्रियां करिष्यसि? किं कर्म करिष्यसि? एवमपि कर्तव्यम्- कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिध्यति। कर्तुरीप्सिततमं कर्मेत्युच्यते। कथञ्च नाम क्रियया क्रियेप्सिततमाभवति। कया क्रियया? सन्दर्शनक्रियया वा प्रार्थयतिक्रियया वाध्यवस्यतिक्रियया वा। इह एष मनुष्यः प्रेक्षापूर्वकारी = विचारपूर्वं क्रियाकर्ता, भवति स बुध्या = बुद्धिवृत्या, तावत् =प्रथमं, कश्चिदर्थं= फलरूपमर्थं, सम्पश्यति, सन्दृष्टे प्रार्थना, प्रार्थनायामध्यवसायः, अध्यवसाये आरम्भः, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्मे त्युक्तम्। तथा च पूर्वोक्तरीत्या क्रियाया अपि क्रिययेप्सिततमत्वात् पत्ये शेते इत्यादौ प्रकृतसूत्रेणैव सम्प्रदानत्वे सिद्धे तत्र सम्प्रदानत्वसिध्यर्थं क्रियाग्रहणं कर्तव्यमिति वार्तिकमनावश्यकमिति भाष्यकाराणामाशयः।

**वार्तिकारम्भपक्षे--** पतिसम्प्रदावकं शयनम्[7] इति बोधः,

**वार्तिकप्रत्याख्यनपक्षे--** पतिसम्प्रदानकमारम्भकर्मभूतं पत्नीकर्तृकं शयनम्[8] इति बोधः। अतः क्रियाग्रहणं कर्तव्यमिति वार्तिकं श्रीमता भाष्यकृता प्रत्याख्यातमित्येव शाब्दिकसिद्धान्तः। अत एव लघुमञ्जूषायां क्रियया यमभिप्रैति स सम्प्रदान**मिति**वार्तिककारमते तु इत्यत्र अरुचिबोधकः **तु**शब्दः प्रयुक्तः। स्पष्टं चेदं सर्वं लघुमञ्जूषायां[9] **संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा।**

**व्यवसायस्तथारम्भे साधनत्वाय कल्पते।।** इत्यादि ग्रन्थेन।

---

[6].पातञ्जलमहाभाष्यम्-पृ-370

[7].वैयाकरणसिद्धान्तलघिमञ्जूषा-पृ-1267

[8]. .वैयाकरणसिद्धान्तलघिमञ्जूषा-पृ-1267

[9]वैयाकरणसिद्धान्तलघिमञ्जूषा-पृ-1267

**सम्प्रादानविषये मतभेदाः**

**धात्वर्थकर्मयत्सम्बन्धितया अभिप्रेतं तत्सम्प्रदानम्** इति वदन्ति न्यायवार्तिककराः[10]। तदुक्तम्- **यद्वस्तु कर्मणा प्राप्तुमभिप्रेतं तत् सम्प्रदानम्।** वृक्षायोदकमासिञ्चति इत्यत्र आसिच्यमानमुदकं कर्म, तेन कर्मणा उदकेन वृक्षं प्राप्नोतीति वृक्षः सम्प्रदानं भवति इति। सम्प्रदानमिति नान्वर्था संज्ञेत्यपि तेषामाशयः। उक्तञ्च न्यायवार्तिकटीकायां वाचस्पतिमिश्रैः [11] **पाणिनीयलक्षणानुरोधेन लौकिकप्रयोगानुरोधाच्च सम्प्रदानमिति नेयमन्वर्था संज्ञेति** भावः।

**भवानन्दस्तु** [12] समप्रदानसंज्ञायाः अन्वर्थत्वं स्वीकृत्य कर्मणा दानकर्मणा, यमभिप्रैति स्वत्वभागित्वेनोद्देश्यीकरोति, स सम्प्रदानमिति व्याख्याय वृक्षायोदकमासिञ्चती त्यत्र वृक्षादेः गौणसम्प्रदानतां निरूपयामास।

**जगदीशोपि**[13] भवानन्दमतमेव अनुसरोति सम्प्रदानलक्षणे।परन्तु चतुर्थ्यर्थतया प्रतियोगित्वं निरूपितत्वं वा स्वीचकार।

**गदाधरोपि**मुख्यभाक्तसाधारणतया क्रियाकर्मसम्बन्धितया कर्त्रभिप्रेतत्वं क्रियजन्यफलसम्बन्धितयेन्यत्वम्। चतुर्थ्यर्थस्तु निरूपितत्वमित्युक्त्वा जगदीशमेवानुचकार।

गोकुलनाथस्तु[14]निरूपकत्वं स्वत्वं वा चतुर्थ्यर्थतया स्वीचकार।

खण्डदेवस्तु[15] सर्वत्र मुख्यसम्प्रदानतां नाङ्गीकरोति। वृक्षादीनां भाक्तमेव सम्प्रदानमिति तस्याशयः।

**वैयाकरणमतनिष्कर्षः**

कर्मणा यम् इति निर्देशात् कर्मकारकं प्रति सम्प्रदानस्य ईप्सितत्वं लभ्यते। तेन फलभागित्वेन ईप्सितत्वं सम्प्रदानत्वमिति सिध्यति। तथा च क्रियाकर्मसम्बन्धजन्यफलभागित्वेनेच्छाविषयत्वं वा सम्प्रदानत्वमिति सिध्यति। वृत्तिकारमते इयं अन्वर्थसंज्ञा। भाष्यमते तु न तथा। सम्प्रदानं त्रिधा विभक्तं वाक्यपदीयकारेण। पत्ये शेते इत्यादौ सूत्रादेव सम्प्रदानत्वसिध्या क्रियाग्रहणं कर्तव्यमिति वार्तिकं नारम्भणीयमेव।

---

[10]..न्यायवार्तिकम्, पृ-196

[11].न्यायवार्तिकतात्पर्यटीका-पृ-254

[12].कारकचक्रम्, पृ-55-61

[13].शब्दशक्तिप्रकाशिका, पृ-156

[14].पदवाक्यरत्नाकरः, पृ-702

[15].भाट्टरहस्यम्, चतुर्थीविचारे-पृ-106